दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-237 | 1 | जून 19, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लपञ्चमी
आषाढः 05 प्रविष्टांशः मङ्गलमयः भवेत्

2 वीवाटेक-2026 सम्मेलने प्रधानमन्त्रिणा मोदीवर्येण भारतं नवोन्मेषस्य प्रौद्योगिक्याः च वैश्विकं केन्द्रं घोषितम्

3 मुख्यमन्त्री सुक्खुः धर्मशालायां आपण-सङ्कुलस्य विनोद-केन्द्रस्य च लोकार्पणम् अकरोत्

4 संस्कृतसंस्कृति- संस्काराणां राष्ट्रियमहाकुम्भः अखिलभारतीय- ऑनलाइन- संस्कृतज्ञान-प्रतियोगिता

## केन्द्रम् अस्मिन् आर्थिकवर्षे षड्विंशति-सहस्रकिलोमीटर्-मितानां ग्रामीणमार्गाणां निर्माणाय अष्टादश-सहस्र-नवशत-कोटिरूप्यकाणि विनियोजयति।

केन्द्रम् अस्मिन् आर्थिकवर्षे षड्विंशतिः सहस्रकिलोमीटर्-मितानां ग्रामीणमार्गाणां निर्माणं करिष्यति। ग्रामविकासमन्त्रालयानुसारं, प्रधानमन्त्री-ग्राम-सड़क-योजना, तत्सम्बद्ध-ग्रामीण-सम्पर्क-उपक्रमाणाञ्च अन्तर्गतं ग्रामीण-मार्गाणां निर्माणार्थं अष्टादश-सहस्र-नवशत-कोटिरूप्यकाणि विनियोजितानि सन्ति। ग्रामीण-मार्ग-सम्पर्क-परियोजनानां प्रगति-मूल्याङ्कनं कर्तुं उच्च-स्तरीय-समीक्षा-सभा सभायाः अध्यक्षः ग्रामीणाभिवृद्धिविभागस्य सचिवः रोहित् कन्सालः, आसीत्। आन्ध्रप्रदेश-बिहारादीनां राज्यानां वरिष्ठाः अधिकारिणः अस्यां सभायां भागम् अगृह्णन्।

## राष्ट्रपतिः द्रौपदी-मुर्मुः मध्यप्रदेश-ओडिशाराज्ययोः पञ्चदिवसीययात्रां प्रारब्धवती।

राष्ट्रपतिः द्रौपदी-मुर्मुः मध्यप्रदेश-ओडिशाराज्ययोः पञ्चदिवसीययात्रां प्रारब्धवती। यात्रायाः प्रथमदिने सा बेतूल-नगरम् अगच्छत्, यत्र प्रजापिता ब्रह्माकुमारीसंस्थया आयोजिते 'आध्यात्मिक-जागरणेन जनजातीयसमुदायानां सशक्तीकरणम्' इति कार्यक्रमे तस्याः सहभागिता अभवत्। राष्ट्रपतिः उक्तवती यत् जनजातीयसमुदायानां सशक्तीकरणार्थं आयोजितम् इदं सम्मेलनम् केवलम् अस्य क्षेत्रस्य न, अपितु सम्पूर्णदेशस्य समाजस्य च हिताय महत्त्वपूर्णम् अस्ति। सा अद्य ओडिशा-राज्यं प्रस्थास्यति।

## केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र-प्रधानः नीट-यू. जी. इति पुनःपरीक्षायै सर्वान् सम्बद्धान् अधिकारिणः जागरूकाः भवेयुरितिनिर्दिष्टवान्

केन्द्रीय-शिक्षा-मन्त्री धर्मेन्द्र प्रधानः रविवासरे निर्धारितायाः नीट-यू. जी. इति पुनःपरीक्षायाः सज्जता-मूल्याङ्कनाय समायोजितायाः उच्च-स्तरीय-समीक्षा-सभायाः अध्यक्षतामकरोत्। सभायां मन्त्री परीक्षा-प्रक्रियायां सत्यनिष्ठायाः, पारदर्शितायाश्च उच्चतममानकानां अनुरक्षणस्य आवश्यकतायाः विषये अवधानं दत्तवान्। सः सर्वान् सम्बद्धान् अधिकारिणः जागरूकाः भवेयुरितिनिर्दिष्टवानपि।

# पैरिस नगरे प्रमुखैः फ्रांसदेशीयैः वाणिज्यनेतृभिः सह अनेकानि उच्च-स्तरीय-मेलनानि कृतानि नरेन्द्रमोदिना



**हिमसंस्कृतवार्ता-पैरिस**

भारत-फ्रान्सयोः आर्थिक-औद्योगिक-सहकारं प्रगाढं कर्तुं प्रयत्नस्य भागरूपेण, प्रधानमन्त्रिणा नरेन्द्रमोदिना पैरिस-नगरे प्रमुखैः फ्रांसदेशीयैः वाणिज्यनेतृभिः सह अनेकानि उच्च-स्तरीय-मेलनानि कृतानि। प्रधानमन्त्री नरेन्द्रमोदी फ्रान्स-देशस्य पैरिस-नगरे आल्स्टोम्-संस्थायाः मुख्य-कार्यकारि-अधिकारिणा मार्टिन् सियोन् इत्यनेन सह मिलितवान्। सामाजिक-प्रसारमाध्यमे विदेश-कार्यमन्त्रालयः अवदत् यत्, प्रधानमन्त्रिणः आल्स्टोम् इत्यस्य मुख्य कार्यकारि-अधिकारिणः च मध्ये आयोजिता चर्चा मोबिलिटी अथ रेल्-आधुनिकीकरणस्य अवसरेषु केन्द्रिता आसीत्। प्रधानमन्त्री पैरिस नगरे मिस्ट्रल्-ए. आई. संस्थायाः सह-संस्थापकेन मुख्य कार्यकारि-अधिकारिणा च आर्थर् मेन्श इत्यनेन सह अपि मिलितवान्। सामाजिक-प्रसार-माध्यमे, प्रधानमन्त्रिणा भारतस्य वर्धमान-ए. आई. इति पारिस्थितिक-व्यवस्थायाः अवसराणां विषयेऽपि अवधानं दत्तम्।

प्रधानमन्त्री मोदी फ्रान्स्-देशस्य राष्ट्रपतिना इम्मैनुयेल मैक्रों इत्यनेन सह विवा-टेक् 2026 इत्यस्मिन् कार्यक्रमे भागं गृहीतवान्। सः शिखरसम्मेलने उच्च-स्तरीय-संवादानां श्रृङ्खलायाः नेतृत्वं कृतवान्, यस्य परिसमाप्तिः बहुप्रतिक्षितेन मुख्य-भाषणेन अभवत्, यस्मिन् भारतस्य खंस्पर्शिनं वैश्विक डिजिटल्-पदचिह्न प्रकाश्यते। विवा-टेक्-शिखरसम्मेलनं यूरोप्-देशस्य बृहत्तमं प्रौद्योगिकी-स्टार्ट-अप्-आयोजनम् अस्ति, यत्र श्रीमोदी भारतस्य वर्धमानां नवान्वेषणात्मिकां पारिस्थितिक-व्यवस्थां, प्रौद्योगिकीय-प्रगतिञ्च प्रकाशितवान्। विवा-टेक्-शिखरसम्मेलनस्य अस्मिन् संस्करणे भारतस्य बृहत्तमं राष्ट्रिय-मंडपम् आसीत्, यः भारतीय-यूरोपीय-नवान्वेषण-व्यवस्थायाः मध्ये सहभागित्वस्य अपार-सम्भावनायाः उपयुक्तं प्रतीकं भविष्यति। प्रधानमन्त्री विशेष-प्रवासिनां कार्यक्रमे भारतीय समुदायस्य सदस्यान् अपि सम्बोधितवान्

## अमेरिका-ईरानदेशयोः मध्ये शान्तिवार्तायाः मार्गः प्रशस्तः



अमेरिका-ईरानदेशयोः मध्ये संधि ज्ञापनम् प्रभावि जातम्, येन चतुर्मासीय-प्रत्यक्षसंघर्षः तत्कालरूपेण विरमितः। उभौ देशौ आगामि-षष्टिदिनपर्यन्तं व्यापक-शान्तिसन्धिवार्तायां सहमतिम् प्रकटितवन्तौ। चतुर्दश-सूत्रीय-संधिपत्रे युद्धविरामस्य, शत्रुतापूर्णक्रियाणां च परित्यागस्य प्रावधानम् अस्ति।

अत्र ईरानदेशस्य परमाणुकार्यक्रमः, क्षेत्रीयसुरक्षासम्बद्धविषयाः अपि चर्चायाः अन्तर्गताः भविष्यन्ति। अमेरिका ईरानस्य नौसैनिक मार्गप्रतिबन्धनं शिथिलीकर्तुं तथा होर्मुज़-जलडमरूमध्ये सामान्य-समुद्रयानानां पुनः स्थापयितुम् प्रयतते।

## कलकत्ता उच्चन्यायालयेन ऋतव्रत-बैनर्जी इत्यस्य नियुक्तेः निर्णय-विषये कापि अन्तरीम-आशवस्तिः दातुं निराकृतम्

कलकत्ता-उच्चन्यायालयेन पश्चिमबङ्गस्य विधानसभायाः अध्यक्षस्य रथीन्द्रबोसस्य विधानसभायाः विपक्षनेतृरूपेण विच्छिन्नस्य तृणमूल्-काङ्ग्रेस्-पक्षस्य विधायकस्य ऋतव्रत-बैनर्जी इत्यस्य नियुक्तेः निर्णय-विषये कापि अन्तरीम-आश्वस्तिः दातुं निराकृतम्। टी. एम्. सी. विधायकेन शोभन्देब चट्टोपाध्याय इत्यनेन स्वस्य नामाङ्कनस्य निराकरणं बनर्जी इत्यस्य नियुक्तिश्च याचिकायां प्रश्नीकृताऽऽसीत् वाद-श्रवणकाले, न्यायमूर्तिः कृष्णरावः अध्यक्षस्य निर्णयम् स्थगयितुं निराकृतवान्।

## सुभाषितम्

**दुर्जनेन समं सख्यं,**
**प्रीतिं चापि न कारयेत्।**
**उष्णो दहति चाङ्गारः,**
**शीतः कृष्णायते करम्॥**
**(हितोपदेश, मित्रलाभ- ८०)**

अर्थात्- दुष्ट के साथ मित्रता और प्रीति नहीं करनी चाहिए। क्योंकि उष्ण अंगारा हाथ को जलाता है और शीतल हाथ को काला कर देता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
असवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## फीफा विश्वचषक स्पर्धायां कोलम्बियादेशस्य विजयः



फीफा विश्वचषक स्पर्धायां कोलम्बियादेशः उज़्बेकिस्तानदेशं त्रि-एक इति अन्तरालेन पराजितवान्। एषा स्पर्धा मेक्सिको-नगरस्य एस्तादियो एज़्टेका क्रीडाङ्गणे अभवत्। ग्रुप एल् इत्यत्र घाना अतिरिक्तसमये निर्णायकं लक्ष्यम् संधाय पनामाइत्यमूं एक-शून्य इति परिणामेन पराजितवान्। इङ्ग्लैण्डदेशः क्रोएशियादेशं चतुर् - द्वि इति परिणामेन पराजित्य विजयं प्राप्तवान्।

## Shimla News - शासकीय-नियन्त्रणे चलिष्यति अधुना सरस्वती-पैराडाइज-इन्टरनेशनल-विद्यालयः, ज्योतिराणा प्रशासिका नियुक्ता



**हिमसंस्कृतवार्ताः — शिमला।** हिमाचलप्रदेशस्य राजधान्याः शिमलायाः संजौली-स्थितस्य सरस्वती-पैराडाइज-इन्टरनेशनल-विद्यालयस्य प्रबन्धनम् अधुना शासकीय-नियन्त्रणे भविष्यति। उपायुक्तेन अनुपमकश्यपेन बृहस्पतिवासरे अतिरिक्त-मण्डल-दण्डाधिकारिणी (प्रोटोकॉल) ज्योतिराणा विद्यालयस्य प्रशासिकात्वेन नियुक्ता। प्रशासिकायाः नियुक्त्या अधुना सम्पूर्णवर्षं यावत् विद्यालयस्य सुचारुरूपेण सञ्चालनस्य मार्गः प्रशस्तः जातः। विद्यालयसञ्चालिकायाः मनीषायाः हत्यायाः अनन्तरं अभिभावकाः चिन्तिताः आसन् यत् विद्यालयः चलिष्यति न वा, सुरक्षां प्रति अपि अभिभावकाः चिन्ताकुलाः आसन्।

### प्रशासिकायाः नियुक्तिः प्रारम्भिक-रूपेण षण्मासाभ्यन्तरकालार्थम्

उपायुक्तः शिमला अनुपमकश्यपेन हिमाचल-पब्लिक-स्कूल-एजुकेशनल-सोसायटी-संजौली इत्यस्य अन्तर्गतस्य सरस्वती-पैराडाइज-इन्टरनेशनल-विद्यालयस्य सुचारु-सञ्चालनाय, छात्राणां शैक्षणिकहितानां सुरक्षायै तथा च प्रशासनिकव्यवस्थायाः सुदृढीकरणाय अयं निर्णयः गृहीतः। प्रशासिकायाः नियुक्तिः प्रारम्भिकरूपेण षण्मासाणाम् अवधये कृता अस्ति। उपायुक्तस्य पक्षतः प्रसारिते आदेशे कथितं यत् विद्यालये शैक्षणिकगतिविधयः, अनुशासनम्, प्रशासनिककार्याणि, छात्राणां हितानि च कस्यामपि स्थितौ प्रभावितानि न भवेयुः। प्रशासिका ज्योतिराणा विद्यालयस्य संस्थायाः (सोसायटी) च दैनिककार्याणां सञ्चालनं करिष्यति। सा संस्थायाः उपविधायकाणाम् (बायलॉज) प्रचलितनियमानां च अनुगुणं नवीन-शासकीय-निकायस्य (गवर्निंग बॉडी) सङ्घटनस्य प्रक्रियां अपि सुनिश्चितां करिष्यति।

### अन्ये अधिकारिणः अपि करिष्यन्ति सहयोगम्

आदेशे स्पष्टीकृतं यत् विद्यालये पठतां छात्राणां शैक्षणिकभविष्यं, शिक्षकाणां कर्मचारिणां च हितानि, संस्थायाः सामान्या कार्यप्रणाली च अक्षुण्णा स्थापयितुं प्रशासनस्य सर्वोच्चा प्राथमिकता भविष्यति। अस्मिन् काले विद्यालयस्य सञ्चालनम् अविरतशः प्रचलिष्यति। शिक्षणकार्यं प्रभावितं न भविष्यति। प्रशासिकायाः साहाय्यार्थं उपमण्डलाधिकारी (ग्रामीण) शिमला, उपनिदेशकः प्रारम्भिकशिक्षा शिमला, सहायक-पञ्जकीयः (रजिस्ट्रार) सहकारी-समितयः शिमला, सहायक-नियन्त्रकः (वित्त लेखा च) उपायुक्तकार्यालयः शिमला तथा च तहसीलदारः शिमला (ग्रामीण) इत्येतेभ्यः अपि आवश्यकतानुसारं सहयोगं प्रदातुं निर्देशः दत्तः अस्ति।

## वीवाटेक-2026 सम्मेलने प्रधानमन्त्रिणा मोदीवर्येण भारतं नवोन्मेषस्य प्रौद्योगिक्याः च वैश्विकं केन्द्रं घोषितम्




फ्रांसदेशस्य राजधान्यां पैरिसनगरे गतदिने आयोजिते 'वीवाटेक-2026' सम्मेलने प्रधानमन्त्रिणा नरेन्द्रमोदीवर्येण भारतं नवोन्मेषस्य (नवाचारस्य) प्रौद्योगिक्याः च वैश्विकं केन्द्रं इति प्रतिपादितम्। प्रधानमन्त्रिणा उक्तं यत् भारतं गते दशके प्रौद्योगिक्याः माध्यमेन तीव्रपरिवर्तनस्य दिशि अग्रे सरति। सः अवदत् यत् भारतं वित्तीय-समावेशने, शिक्षायाम्, कृषिक्षेत्रे अन्येषु च क्षेत्रेषु व्यापकतया प्रौद्योगिक्याः उपयोगं करोति। श्रीमोदीवर्येण स्पष्टीकृतं यत् भारताय विश्वस्य बृहत्तमा अंकीय-अभिज्ञान-प्रणाली (डिजिटल पहचान प्रणाली) तथा विश्वस्य विशालतमं अंकीय-भुगतान-मञ्चं (डिजिटल भुगतान प्लेटफॉर्म) विकसितं कृतम् अस्ति। प्रधानमन्त्रिणा कथितं यत् प्रौद्योगिक्या प्रगतिः तदैव सम्भवति यदा तस्याः लाभः सर्वान् प्राप्नुयात्। सः अवदत् यत् भारतस्य विश्वासः अस्ति यत् अस्मिन् संकटपूर्णे युगे प्रौद्योगिक्याः लाभः सर्वेभ्यः मिलितव्यः। सः वैश्विक-नवोन्मेषकान् भारतेन सह मिलित्वा कार्यं कर्तुं तथा च तादृशीं नूतनां प्रौद्योगिकीं विकसितुं आहूतवान् या सर्वेषां कृते कल्याणकारी भवेत्। आर्थिक-प्रौद्योगिक-सहयोगं सुदृढं कर्तुं श्रीमोदीवर्येण फ्रांसदेशस्य प्रमुख-व्यवसायिभिः सह अपि उपवेशनानि कृतानि।

## अद्य नवदेहल्यां प्रधानमंत्री-विकसित-भारत-रोजगार-योजना इत्यस्यान्तर्गतं द्विसहस्र-चतुश्शत-कोटिरूप्यकाणां प्रोत्साहकाणां वितरणम् करिष्यति प्रधानमन्त्री

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्यां प्रधानमंत्री-विकसित-भारत-रोजगार-योजना इत्यस्यान्तर्गतं द्विसहस्र-चतुश्शत-कोटिरूप्यकाणां प्रोत्साहकाणां वितरणम् करिष्यति। नवदेहल्यां योजनायाः विषये प्रसारमाध्यमान् सम्बोधयन् श्रम-रोजगार-मन्त्री डा. मनसुख-माण्डवियाः अवदत् यत् गतवर्षस्य आगस्ट्-मासात् आरभ्य त्रिषष्टि-लक्षतोऽधिकाः कर्मचारिणः पि. एम्. वी. बी. आर्. वाय. इत्यस्यान्तर्गतं औपचारिक कार्यक्षेत्रे आनीताः सन्ति, येषु प्रायः त्रिंशत्प्रतिशतं महिलाः सन्ति। सः इतोऽपि अवोचत् यत् अस्याः योजनायाः अन्तर्गतं प्रोत्साहिताः अशीतिः प्रतिशतात् अधिकाः संस्थाः पञ्चविंशतितः न्यूनाः लघूद्यमाः सन्ति।

भारतस्य सांस्कृतिकधरोहरायाः संरक्षणे प्रधानमन्त्रिणः संदेशः प्रधानमन्त्री नरेन्द्रमोदी अद्य उक्तवान् यत् भारतस्य सांस्कृतिकधरोहरस्य संरक्षणं, संवर्धनं च नवोत्साहेन वर्ज्यमानम् अस्ति। सामाजिक-अन्तर्जाल-माध्यमेन प्रकाशिते सन्देशे तेन उक्तं यत् 'विरासत भी विकास भी' विरासतः अपि विकासोपि' इति दृष्ट्या प्रेरिताः प्रयासाः जनान् भारतस्य सनातनपरम्पराभिः पुनः संयोजयन्ति। पुरातनवस्तूनां प्रत्यावर्तनात् आरभ्य आध्यात्मिक-तीर्थयात्रासम्बद्धाधारसंरचनायाः सुदृढीकरणपर्यन्तं विविधाः उपक्रमाः निरन्तरं प्रवर्तन्ते।

## न पिहितौ भविष्यतः मुल्थान-कुपवी-स्नातक-महाविद्यालयौ, राज्यसर्वकारेण परिवर्तितः निर्णयः

**हिमसंस्कृतवार्ताः — शिमला ।** हिमाचलप्रदेशसर्वकारेण उच्चशिक्षण-संस्थानां पुनर्सङ्घटनं अधिकृत्य स्वकीये निर्णये अन्यमेकं संशोधनं कृतम, येन द्वयोः शासकीय-स्नातक-महाविद्यालययोः विलीनीकरणसम्बद्धः (विलय सम्बन्धी) आदेशः सद्यःप्रभावेण प्रतिनिवर्तितः। उच्चशिक्षाविभागेन प्रसारितायाम् अधिसूचनायाम् राजकीय-स्नातक-महाविद्यालय-मुल्थान (काङ्गड़ामण्डलम्) तथा च राजकीय-स्नातक-महाविद्यालय-कुपवी (शिमलामण्डलम्) इत्यनयोः विलीनीकरणस्य निर्णयः निरस्तीकृतः। उच्चशिक्षाविभागस्य सचिवस्य पक्षतः प्रसारितायाम् अधिसूचनायां कथितं यत् २ जून् २०२६ दिनाङ्के कॉलेज-विलीनीकरणसम्बद्धा या अधिसूचना प्रसारिता आसीत्, तस्यां तयोः उभयोः महाविद्यालययोः सन्दर्भे कृतानि प्रावधानानि सद्यःप्रभावेण निरस्तीक्रियन्ते। अनेन सह एव उभे अपि शिक्षणसंस्थाने पूर्ववत् स्वतन्त्ररूपेण सञ्चालिते भविष्यतः। विशेषोल्लेखनीयं यत् राज्यसर्वकारेण साम्प्रतमेव न्यून-छात्रसङ्ख्यायुक्तानां बहूनां शासकीय-महाविद्यालयानां विलीनीकरणस्य निर्णयः गृहीतः आसीत्। अस्मात् निर्णयात् परं प्रभावितेषु क्षेत्रेषु छात्र-छात्राभिः, अभिभावकैः, स्थानीयप्रतिनिधिभिः तथा च विभिन्नैः सामाजिकसङ्घटनैः चिन्ता प्रकटीकृता आसीत्। एतस्मात् पूर्वमपि सर्वकारः अन्येषामपि त्रयाणां स्नातक-महाविद्यालयानां विलीनीकरणस्य निर्णयं प्रतिनिवर्तितवान् अस्ति।

## नवदेहली: केन्द्रीयमन्त्रिणा मनोहरलालेन 'भारत बिल्डकॉन 2026 - एकं राष्ट्रं, एका प्रदर्शनी' इत्यस्याः उद्घाटनं कृतम्



**हिमसंस्कृतवार्ता।** आवासन-शहरीकार्यमन्त्रिणा मनोहरलालेन नवदेहल्यां 'भारत बिल्डकॉन 2026 – एकं राष्ट्रं, एका प्रदर्शनी' (एक राष्ट्र, एक प्रदर्शनी) इत्यस्याः उद्घाटनं विहितम्। 'भारत बिल्डकॉन' भवननिर्माणसामग्र्याः निर्माणोद्योगस्य च सम्बद्धा एका प्रदर्शनी अस्ति। अस्यां प्रदर्शन्यां नवत्यधिकाः (90+) देशाः भागं गृह्णन्ति (प्रतिभागित्वं कुर्वन्ति)।

## न्यूज़ीलैंड देशे एफआईएच महिला-नेशन्स-कप् इति हॉकीस्पर्धायां

### भारतदलम् उरुग्वे-देशं त्रि-द्वि इति अन्तरालेन विजित्य उपान्त्यचक्रं प्रविष्टम्

एफआईएच महिला-नेशन्स्-कप-हॉकीस्पर्धायां भारतदलम् उरुग्वे-देशं त्रि-द्वि इति अन्तरालेन पराजितवत्, उपान्त्यचक्रं प्रविष्टम् च। अयं भारतस्य निरन्तरं तृतीयः विजयः अस्ति । तिसृषु स्पर्धासु विजयं प्राप्य भारतदलम् पूल्-ए इति मध्ये शीर्षस्थानं प्राप्तवत् तथा उपान्त्यचक्रं प्रविष्टवत्। उपान्त्यचक्रे भारतदलस्य साम्मुख्यं चिली-कोरिया-देशयोः मध्ये भाविना स्पर्धायाः विजेतृदलेन सह भविष्यति।

# मुख्यमन्त्री सुक्खूः धर्मशालायां आपण-सङ्कुलस्य विनोद-केन्द्रस्य च लोकार्पणम् अकरोत्



**हिमसंस्कृतवार्ताः - धर्मशालाः।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः काङ्गड़ामण्डलस्य धर्मशाला-स्थित-मण्डल-आयुर्वेदिक-चिकित्सालय-परिसरे निर्मीयमाणस्य पञ्चाशत् (५०) शय्यायुक्त-क्षमतायाः एकीकृत-आयुष-चिकित्सालयस्य शिलान्यासम् अकरोत्। मुख्यमन्त्री अवदत् यत् राज्यसर्वकारः आधुनिक-स्वास्थ्य-सेवाभिः सह आयुष-चिकित्सा-पद्धतीनां समन्वयम् विधाय समग्र-एकीकृत-स्वास्थ्य-प्रणाल्याः सुदृढीकरणाय निरन्तरं प्रयतते। अस्य नूतन-चिकित्सालयस्य निर्माणेन क्षेत्रे स्वास्थ्य-अधोसंरचनायै (स्वास्थ्य-इन्फ्रास्ट्रक्चर) बलं प्राप्स्यति तथा च जनेभ्यः आयुष-चिकित्सा-पद्धतियुक्ताः एकीकृत-स्वास्थ्य-सेवाः अधिक-सुलभतया उपलप्स्यन्ते। तदनन्तरं मुख्यमन्त्रिणा धर्मशालायाः चरान-क्षेत्रे 'स्मार्ट सिटी लिमिटेड' (डीएससीएल) इत्यनया ७.५० कोटिरूप्यकाणां व्ययेन निर्मितस्य आपण-सङ्कुलस्य (शॉपिंग कॉम्प्लेक्स) विनोद-केन्द्रस्य (मनोरंजन केंद्र) च लोकार्पणं कृतम्।
सः अकथयत् यत् अस्याः सुविधायाः आरम्भेण स्थानीयजनेभ्यः क्रयण-विनोद-दैनिकोपयोगसम्बद्धाः अन्याः आवश्यकाः सुविधाः एकेन एव स्थाने उपलप्स्यन्ते, येन ते लघु-आवश्यकताभ्यः दूरं गन्तुं न विवशाः भविष्यन्ति। अनेन जनानां समयस्य धनस्य च द्वयोः अपि रक्षा भविष्यति। मुख्यमन्त्रिणा कथितं यत् अस्य केन्द्रस्य आरम्भेण क्षेत्रे जनानां गमनागमनं वर्धिष्यते, येन समीपस्थानां आपणिकानां लघु-उद्यमिनां च कृते व्यापारस्य आयस्य च नवीनाः अवसराः सृष्टाः भविष्यन्ति, तेभ्यश्च प्रत्यक्षः लाभः प्राप्स्यते। अस्मिन् अवसरे कृषिमंत्री चन्द्रकुमारः, आयुषमन्त्री यादविन्द्रगोमा, उप-मुख्यसचेतकः केवलसिंहपठानिया, विधायकाः किशोरीलालः, मलिन्द्राजनः, कमलेशठाकुरः अन्ये च गण्याः मान्याः च जनाः उपस्थिताः आसन्।

# "लौकिकन्यायकोशः" "इन्दुक्ष्वेडन्यायः"


क्ष्वेडः नाम विषम्। इन्दुः नाम चन्द्रः। शिवः स्वमूर्धनि चन्द्रं धारयति। अज्ञानाम् उपरि विषधारिणः सर्पान् धारयति। चन्द्रं मूर्धनि विषं च कण्ठे च धारयति। बुद्धिमान् मनुष्यः गुणान् दोषान् च स्वीकरोति। सः अन्येषाम् गुणान् प्रशंसति दोषान् आच्छादयति अर्थात् तस्य उपरि आच्छादकं स्थापयति इव। शिवः अपि विषं कण्ठे नियच्छति आच्छाद्य स्थापयति।

## एकस्मिन् तूणीरे द्वौ असीः न स्तः

प्रेम्णः वीथिः अति सङ्कीर्णा। तत्र द्वौ न निवसतः।
यत्र अहम् अस्मि। तत्र प्रेम न वसति। यत्र प्रेम वसति तत्र अहं न। अर्थात् यत्र प्रेम विद्यमानं तत्र अहङ्कारस्य कृते स्थानं न। अहङ्कारः अस्ति चेत् प्रेम ततः पलायनं करोति।

**डा.वर्षा प्रकाश टोणगांवकर, पुणे / महाराष्ट्रम्**

# शान्ताकुमारः अवदत्, सर्वकारः 'लिव-इन रिलेशनशिप' इत्यस्य उपरि प्रतिबन्धं स्थापयेत्



**हिमसंस्कृतवार्ताः — पालमपुरम् ।** भूतपूर्व-मुख्यमन्त्री भूतपूर्व-केन्द्रीयमन्त्री च शान्ताकुमारः अकथयत् यत् पञ्जाब-हरियाणा-उच्चन्यायालयः 'लिव-इन रिलेशनशिप' (सह-सम्बन्धः) इत्यस्य सन्दर्भे कश्चन अतीव महत्त्वपूर्णः निर्णयः दत्तवान्। 'लिव-इन' सम्बन्धे निवसतोः द्वयोः युवयोः परिवाराः तौ गृहं प्रतिगन्तुं विवशौ कुर्वन्तः आसन्। उभौ युवानौ अवदताम् यत् तौ प्राप्यवयस्कौ (बालिग) स्तः, अतः परिवारैः क्रियमाणात् उत्पीडनात् तयोः संरक्षणं दीयताम्। न्यायालयः संरक्षणं प्रदातुं अस्वीकुर्वन् अवदत् यत् तौ स्वकीययोः उभयोः परिवारयोः सांविधानिकान् अधिकारान् समापयन्तः स्तः। तयोः परिवारयोः समाजे अपकीर्तिः (बदनामी) जायमाना अस्ति, अतः न्यायालयः एतयोः किमपि संरक्षणं न प्रदास्यति।

## सततं वर्धते सङ्ख्या

शान्ताकुमारः अवदत् यत् पाश्चात्यसभ्यतायाः प्रभावेण 'लिव-इन' सम्बन्धे निवसताम् जनानां सङ्ख्या निरन्तरं वर्धते। विगतेषु दिनेषु तेषु काश्चन हत्याः अपि अभवन्। पाश्चात्यसभ्यतायाः प्रभावेण जनैः एवं प्रकारेण स्वपरिवारान् विहाय निवासेन समाजे कुधारणा प्रसरति, भारतस्य च नैतिकतायाः आधारशिला उन्मूलिता भवन्ती अस्ति। सः सर्वकारं न्यवेदयत् यत् सर्वकारः नियमेन (कानून द्वारा) 'लिव-इन' सम्बन्धे प्रतिबन्धं विकिरेत्। परस्परं प्रेम कुर्वन्तौ युवक-युवत्यौ विधिना विवाहं कुरुताम्, अन्यथा स्वपरिवारेषु एव निवसेताम्।



# वार्ता-संवादः

**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। वियतनामदेशस्य आरक्षकैः मार्जार-मांसविक्रयणस्य एकः अपराधसङ्घः भञ्जितः अस्ति। तत्र शतशः मार्जाराः रक्षिताः।
**काव्या-** नमस्ते नन्दिनि। मार्जाराणां कष्टं श्रुत्वा मम दुःखं जातम्, किन्तु आरक्षकाणां कार्यं श्लाघनीयम् अस्ति। बेङ्गळूरु-नगरे काचित् महिला
गृह-सङ्घानां विषये उपहासात्मकं वक्तव्यं कृतवती अस्ति। तया उक्तम् यत् एते सङ्घाः "व्हाट्सएप- संसद्- युक्ताः सम्प्रभु-देशाः" इव सन्ति।
**नन्दिनी-** सत्यम्, एतेषु गृहसङ्घेषु यान- स्थापन-विषये अपि महत् युद्धं कृतम्! अधुना क्रीडाजगतः वार्ता। सोनीसंस्थया नूतनस्य क्रीडा- नियन्त्रकस्य एकाधिकारपत्रं प्राप्तम्। यस्य पिञ्जाः वास्तविक-काले काठिन्यं कोमलतां च प्राप्तुं शक्नुवन्ति।
**काव्या-** एतत् अतीव रोचकम्! अनेन नूतन- तन्त्रज्ञानेन क्रीडा-अनुभवः अतीव प्रकृतः भविष्यति। अधुना अन्तिमा वार्ता। क्रोएशिया- देशस्य रोविञ्जनगरे एकः मास-वयस्कः 'माइल' नामकः अर्वकः चतुस्तले स्थिते गृहे वसति। सः स्वमात्रा परित्यक्तः, अतः सः गृह-सदस्यैः रक्षितः।
**नन्दिनी-** अहो! अर्वकस्य कथा मम हृदयं स्पृष्टवती अस्ति। बेङ्गळूरु-नगरस्य गृह-सङ्घानां विपरीतम्, तत्र प्रतिवेशिभिः कोपः न कृतः। अद्यतने कार्यक्रमे एतावती एव वार्ता। श्वः पुनः मेलिष्यामः। धन्यवादः।

# वास्तविकः वैरागी कः?

एकस्याः नद्याः तटे एकः साधुः वसति स्म। प्रतिदिनम् एकः अशिक्षितः नाविकः तं नौकायाम् उपवेश्य तटात् परं तटं नयति स्म। प्रतिफलरूपेण सः किमपि न गृह्णाति स्म। तथापि भगवद्वस्त्रधारिणः साधोः समीपे दातुं धनं कुत्र आसीत्?
नाविकः सरलः आसीत्, यद्यपि सः विद्यालयं न गतवान् तथापि बुद्ध्या धनी आसीत्। साधुः मार्गभरे ज्ञानं ददाति स्म - कदाचित् ईश्वरस्य सर्वव्यापकत्वं बोधयति स्म, कदाचित् च गीतायाः श्लोकान् अर्थसहितं श्रावयति स्म। नाविकः अरित्रं (चप्पू) चालयति स्म, परन्तु कर्णौ मनः च द्वयमपि साधोः वचनेषु एव सल्लग्नं करोति स्म। बाबावर्यस्य वचनानि साक्षात् तस्य हृदये प्रविशन्ति स्म। एकस्मिन् दिने परं तटं प्राप्य साधुः नाविकं स्वकुटीरं नीतवान्। सः अवदत् - "वत्स! अहं पूर्वं महान् व्यापारी आसम्। प्रासादः, धनं, सेवकाः च सर्वम् आसीत्। परन्तु एकस्यां दुर्घटनायां सम्पूर्णं परिवारं नष्टम् अभवत्। अस्य धनस्य अहं इदानीं किं करोमि? त्वं एतत् गृहाण। तव जीवनस्य परिष्कारः, पुत्राणां भविष्यं च उज्ज्वलं भविष्यति।"
नाविकः हस्तौ बद्ध्वा अस्मयत - "न बाबा! एतत् धनं अहं ग्रहीतुं न शक्नोमि। मुधा (मुफ्त का) धनं गृहे आगते एव श्रमः नश्यति। पुत्राः कार्यं त्यक्ष्यन्ति, आलस्यम् आगमिष्यति, लोभः च वर्धिष्यते। ततः पापम् अपि अनुपदम् (पीछे-पीछे) आगमिष्यति।"
"भवता एव तु पाठितं यत् कणे-कणे रामः वसति। मह्यं तु इदानीं एतासु तरङ्गेषु अपि स एव दृश्यते। यदा तस्य दृष्टिः प्रतिक्षणं मयि अस्ति, तर्हि अहं चिन्ता किं करोमि? अहं स्वम् अरित्रं चालयिष्यामि, नौकां च खेयिष्यामि (चलाता रहूँगा)। अवशिष्टं सर्वं तस्मिन् एव समर्पितवान्।" साधोः नेत्रे अश्रुपूर्णे अभवताम्। यस्मै सः ज्ञानं ददाति स्म, वास्तविकाशयेन स एव तस्मात् महान् ज्ञानी जातः।

**तर्हि वास्तविकः वैरागी कः?**

एकः सः साधुः - येन दुःखम् आगतं तर्हि गृहं त्यक्तं, भगवद्वस्त्रं धृतं, ग्रन्थाः कण्ठस्थीकृताः, प्रवचनदानं च शिक्षितम्। परन्तु मनसः धनस्य ममता न गता। बहुवर्षेभ्यः परम् अपि सः सुपात्रं कस्यचित् अन्वेषणं करोति स्म यत् कस्मै ददामि। द्वितीयः सः नाविकः - यस्य समीपे प्रातःकालस्य रोटिकायाः ज्ञानं नास्ति यत् सायङ्काले मिलिष्यति वा न वा। भगवद्वस्त्रं न धृतं, गृहं न त्यक्तं, संन्यासोऽपि न गृहीतः। परन्तु संसारे स्थित्वा अपि संसारात् निर्लिप्तः अभवत्। गीतां केवलं न श्रुतवान्, अपितु जीवनं जीवति स्म। ।

# मुंगेली-नगरे ब्लूप्रिण्ट- प्रश्नपत्रनिर्माण- शिक्षा-शास्त्रविषयकं पञ्चदिवसीय-प्रशिक्षणं सम्पन्नम्



हिमसंस्कृतवार्ताः- मुंगेली, छत्तीसगढशासनस्य माध्यमिक- शिक्षामण्डल- रायपुरस्य निर्देशानुसारं तथा जिला- शिक्षक- प्रशिक्षण- संस्थानस्य (डाइट) प्रेरणयामार्गदर्शनेन च मुंगेलीनगरस्य बीआरसीसीप्रशिक्षणकेन्द्रे ०८ जूनतः १२ जून २०२६ पर्यन्तं ब्लूप्रिण्ट- प्रश्नपत्रनिर्माणं एवं शिक्षाशास्त्रम् इति विषये पञ्चदिवसीयप्रशिक्षणस्य सफलतया आयोजनं कृतम्। प्रशिक्षणस्य समापनसमारोहे मुख्यातिथिरूपेण उपस्थितः जिलाशिक्षाधिकारी एल. पी. डाहिरे महोदयः उपस्थितान् व्याख्यातॄन् प्रशिक्षणार्थिनश्च सम्बोधयन् अवदत् यत् माननीयस्य कलेक्टरमहोदयस्य कुन्दनकुमारस्य मार्गदर्शनेन अस्मिन् वर्षे मुंगेलीजिलायाः मण्डलपरीक्षाफलम् अत्यन्तं सन्तोषजनकम् अभवत्। आगामि-सत्राय कक्षा ९ तः १२ पर्यन्तं विद्यार्थिनां कृते स्पष्टशैक्षणिकलक्ष्याणि निर्धारितानि सन्ति। एपीसी तीरथप्रसाद-बड़गैयाँ महोदयः स्ववक्तव्ये अवदत् यत् आगामिकालः कृत्रिमबुद्धेः भविष्यति। अतः शिक्षकैः डिजिटल- आधारित- शिक्षणपद्धतिः स्वीकर्तव्या। ब्लूप्रिण्ट- निर्माणसम्बद्धं एतत् प्रशिक्षणं विद्यार्थिनां कृते अत्यन्तम् उपकारकम् भविष्यतीति अपि तेन उक्तम्। विकासखण्डशिक्षाधिकारी श्री जितेन्द्र बावरे महोदयः पठनलेखनकौशलयोः महत्त्वं प्रतिपादयन् अवदत् यत् शिक्षकैः विद्यार्थिभिश्च निरन्तरम् अध्ययनस्य अभ्यासः करणीयः। बालकानां लेखनक्षमताविकासाय नियमितं वाचनं लेखनाभ्यासश्च अनिवार्यः। बीआरसीसी सूर्यकान्त उपाध्याय महोदयः प्रशिक्षणस्य रूपरेखां प्रस्तौति स्म। तेन उक्तं यत् अस्मिन् पञ्चदिवसीयप्रशिक्षणे कक्षा ९ तः १२ पर्यन्तं ब्लूप्रिण्टनिर्माणम्, शिक्षाशास्त्रम् तथा ब्लूम-टैक्सोनॉमी (१९५६) इत्यस्य विविधविषयेषु विस्तृत-परिचर्चा अभवत्। प्रतिवेदनप्रस्तुतौ प्राचार्यः हजारीलाल कुर्रे, लक्ष्मी झा, राहुल वर्मा, कैलाशसिंह क्षत्री महोदयाः च ब्लूम- टैक्सोनॉमी- आधारितस्य ज्ञानम्, अवबोधनम्, अनुप्रयोगः, विश्लेषणं, मूल्याङ्कनं ज सृजनात्मकता चेत्यादीनां आधारेण प्रश्नपत्रनिर्माणप्रक्रियायाः विस्तृतं विवेचनं कृतवन्तः। संस्कृतविषयस्य व्याख्याता डॉ. रामबाबु मिश्र महोदयेन संस्कृतविषयस्य ब्लूप्रिण्टनिर्माणम्, ब्लूम- टैक्सोनॉमी- आधारितशिक्षणं डिजिटलमाध्यमेन संस्कृतशिक्षणविषये विशेषप्रस्तुतीकरणं प्रदर्शनी च आयोजिता। प्रदर्शिन्यां संस्कृतभाषायाः महत्त्वम्, नवीन- शिक्षणप्रविधयः तथा डिजिटल-संसाधनानां विषये विस्तृत-जानकारी प्रदत्ता। जिला- शिक्षाधिकारी तथा तेषां दलं प्रदर्शिन्याः अवलोकनं कृत्वा एतां विद्यार्थिनां कृते एतं उपक्रमं प्रेरणादायिनम् उपयोगिनं च प्रशंसितवन्तः। अवसरेऽस्मिन् हिमाचलप्रदेशस्थ श्रीवत्सदेशराजशर्ममहाभागः वैदिकगणसंस्थायाः संस्थापकाध्यक्षो द्वारा डॉ. रामबाबू मिश्र महोदयस्य संस्कृतभाषाशिक्षाक्षेत्रयोः योगदानेन प्रभावितः सन् तेषां सम्मानार्थं भावपूर्णा कविता प्रस्तुता। तस्यां कवितायां तान् संस्कृतसरितः निर्मलप्रवाहः, ज्ञानज्योतेः प्रकाशपुञ्जः तथा विद्यार्थिनां पथप्रदर्शकगुरुः इति वर्णितम्। कविताश्रवणानन्तरं डॉ. रामबाबू मिश्र महोदयः सर्वेभ्यः हार्दिकं धन्यवादं ज्ञापितवान्। एतत् सम्मानं संस्कृतभाषायाः शिक्षाजगतश्च सम्मानम् इति उक्तवान्। कार्यक्रमे मास्टरट्रेनररूपेण मोहन उपाध्याय, डॉ. रामबाबू मिश्र, संगीता सिंह, शिवशङ्कर नेताम महोदयाः तथा कला, वाणिज्य, भाषा-समूहस्य समस्ताः प्रशिक्षणार्थिनः उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं डॉ. रामबाबू मिश्र महोदयेन कृतम्, आभारप्रदर्शनं बीआरसीसी सूर्यकान्त उपाध्याय महोदयेन कृतम्। जयतु संस्कृतम्। जयतु भारतम्।

## कूडल अझगर मन्दिरम्: भूमौ न पतति मन्दिरशिखरस्य छाया, षट्पादपरिमितो (६ फीट) अस्ति विग्रहः

भगवतः नारायणस्य आराधना कोटिकोष्टानां पापानां च निवारिका अस्ति। अद्य वयं भवद्भिः सह नारायणस्य तादृशस्य एकस्य मन्दिरस्य विषये चर्चां कुर्मः, यत् स्वयमेव विशिष्टम् अद्भुतं च अस्ति। दक्षिणभारतस्य अस्य विलक्षणस्य नारायणमन्दिरस्य नाम 'कूडल अझगर' इति अस्ति, यत् मदुरैनगरे स्थितम् अस्ति। एतद् मन्दिरं न केवलं धार्मिकदृष्ट्या, अपितु स्वकीयाय अनुपमाय वास्तुकलायै अपि सुप्रसिद्धम् अस्ति। षट्शतवर्षेभ्यः (६०० वर्षेभ्यः) अपि प्राचीनं एतत् विष्णुमन्दिरं १०८ दिव्यदेशमेषु (दिव्यधामसु) अन्तर्भवति, यत्र भगवान् नारायणः कूडल अझगर अर्थात् सुन्दरे सर्पशय्यारूपे विराजमानः सन् भक्तेभ्यः दर्शनं ददाति। कथ्यते यत् द्वादशशताब्दीतः चतुर्दशशताब्द्याः मध्ये एतद् मन्दिरं मूलरूपेण पाण्ड्यराजवंशस्य राजभिः निर्मितम् आसीत्। पश्चात् षोडशशताब्द्यां विजयनगरस्य मदुरैदेशस्य च राजभिः मन्दिरस्य मुख्यसभामण्डपस्य अन्यमन्दिराणां च निर्माणं कारितम्। षट्पादपरिमितः विग्रहः (६ फीट की प्रतिमा)- एतत् एकं वैष्णवमन्दिरम् अस्ति। मन्दिरस्य अन्तः भगवतः विष्णोः उपविष्टा, उत्थिता (स्थिता) तथा शयिता च इति तिसृषु मुद्रासु मूर्तयः सन्ति, याः कृष्णशिलाभिः (ग्रेनाइट) निर्मिताः सन्ति। उपविष्टमुद्रायां स्थापिता प्रतिमा षट्पादपरिमिता (६ फीट) उन्नता अस्ति। भगवतः मूर्तेः उभयतः श्रीदेवी-भूदेव्योः प्रतिमे स्थापिते स्तः। मन्दिरस्य अन्तः काष्ठकलायाः (नक्काशी) सूक्ष्माङ्कनम् अपि कृतम् अस्ति, यस्मिन् भगवान् श्रीरामचन्द्रस्य राज्याभिषेकमहोत्सवः प्रदर्शितः अस्ति। अस्य मन्दिरस्य मुख्या विशेषता एषा अस्ति यत् अस्य शिखरस्य छाया भूमौ न पतति।

# संस्कृतसंस्कृति- संस्काराणां

## राष्ट्रियमहाकुम्भः अखिलभारतीय- ऑनलाइन- संस्कृतज्ञान-प्रतियोगिता



हिमसंस्कृतवार्ता, देहरादूनम्। स्व. डॉ. वाचस्पति-मैठाणी-महोदयस्य ७७तम- जयंती- अवसरे सप्तमी अखिलभारतीय- ऑनलाइन- संस्कृतज्ञान-प्रतियोगिता २०२६ पञ्जीकरणप्रक्रिया प्रारब्धा।

- व्हाट्सएप-माध्यमेन, जालपुटेन च पञ्जीकरणस्य सुविधा।
- पञ्चवर्षीयबालकात् आरभ्य वरिष्ठनागरिकपर्यन्तं सर्वे प्रतिभागिनः भवितुमर्हन्ति।
- देशविदेशस्थिताः संस्कृतप्रेमिणोऽपि प्रतियोगितायां सहभागित्वं कर्तुं शक्नुवन्ति।

राष्ट्रपतिपुरस्कारसम्मानितः शिक्षाविद्, उत्तराखण्डराज्यस्य पूर्वसंस्कृतशिक्षानिदेशकः, "संस्कृतपुरुषः" इति ख्यातः स्वर्गीयः डॉ. वाचस्पति-मैठाणी-महोदयः अस्य वर्षस्य अगस्तमासस्य २८ तमे दिने ७७तमां जयन्तीं प्राप्स्यति। तस्याः पावनस्मृतौ सप्तमी अखिलभारतीय- ऑनलाइन- संस्कृतज्ञान- प्रतियोगिता– २०२६ इत्यस्याः पञ्जीकरणप्रक्रिया सम्प्रति प्रारब्धा अस्ति।

प्रतियोगितायाः राष्ट्रियसंयोजकः कैलाशपति- मैठाणी-महोदयः अवदत् यत् संस्कृतभाषायाः, भारतीयसंस्कृतेः, सनातनमूल्यानां, नैतिकसंस्काराणां संरक्षणसंवर्धनार्थम् आयोजितायां अस्यां प्रतियोगितायां सर्वे संस्कृतप्रेमिणः सहभागित्वं कर्तुं शक्नुवन्ति। गतवर्षेषु वरिष्ठनागरिकैः तथा प्रवासीभारतीयैः प्रदर्शितमुत्साहं दृष्ट्वा अस्मिन् वर्षेऽपि तेषां विशेषसहभागिता सुनिश्चितीक्रियते। तस्य कथनानुसारं प्रतियोगितायां विभिन्नवयोवर्गानुसारं विविधाः स्पर्धाः आयोज्यन्ते- ५– ९ वर्षपर्यन्तानां बालकानां कृते बालसंस्कार- माङ्गलिकश्लोकगानम्,
१०–१६ वर्षपर्यन्तानां कृते संस्कृतदेशभक्तिगीतगानम्,
१७–२५ वर्षपर्यन्तानां कृते प्रेरणादायिकलघुकथावाचनम्,
२६–५० वर्षपर्यन्तानां कृते भर्तृहरि-नीतिशतक-श्लोकगानम्,
५१ वर्षाधिकवयस्कानां कृते स्तोत्रगानम्,
९–१८ वर्षपर्यन्तानां कृते संस्कृतगीतनृत्यम्,
तथा कक्षा ३ तः १२ पर्यन्तं पठमानानां विद्यार्थिनां कृते ऑनलाइन-संस्कृतसामान्यज्ञान-प्रतियोगिता च आयोजिता भविष्यति। प्रतिभागिभिः स्वकीयाः चलचित्ररूपेण प्रस्तुतयः २०२६ वर्षस्य जुलाईमासस्य ३१ तिथेः पूर्वं सम्बन्धित-व्हाट्सएप-समूहेषु प्रेषणीयाः। मैठाणी-महोदयेन उक्तं यत् निर्णायकमण्डलस्य मूल्याङ्कनस्य अतिरिक्तं स्मृतिमञ्चस्य फेसबुकपृष्ठे प्राप्तदर्शकसंख्याया आधारेण अपि प्रतिभागिभ्यः अधिकतमं २० अङ्काः प्राप्तुं अवसरः भविष्यति। संस्कृतसामान्यज्ञान-प्रतियोगिता २०२६ अगस्तमासस्य २७ तमे दिने गूगल- क्विज- माध्यमेन ऑनलाइन-पद्धत्या भविष्यति। प्रतियोगिताफलानि च २०२६ अगस्तमासस्य २८ तमे दिने, स्व. डॉ. वाचस्पति-मैठाणी-महोदयस्य ७७ तम-जयंती-अवसरे घोष्यन्ते।प्रतियोगितायां प्रथम- द्वितीय-तृतीय- स्थानप्राप्तेभ्यः पुरस्काराः, स्मृतिचिह्नानि च प्रदास्यन्ते, सर्वेभ्यः प्रतिभागिभ्यः प्रमाणपत्राणि अपि प्रदीयन्ते।